नैयायिकाः। फल एव शक्तिरिति मण्डनादयः। व्यापारे शक्तिरिति रत्नकोषकृत्। आख्यातस्य कृतौ शक्तिरिति नैयायिकाः। कर्त्तरि शक्तिरिति शाब्दिकाः। व्यापारमात्रे शक्तिरिति मीमांसकाः। चतुर्विधविषयत्वात् तस्याश्चातुर्विध्यं शब्दश०प्र० अलङ्कारिमते दर्शितं यथा

"जातिद्रव्यगुणस्पन्दैर्धर्मैः सङ्केतवत्तया। जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः"। गोगवयादीनां गोत्वादिजात्या, पश्वाद्यादीनां लाङ्गूलधनादिद्रव्येण, धन्यपिशुनादीनां पुण्यद्वेषादिगुणेन चलचपलादीनाञ्च शब्दानां कर्मणावच्छिन्नशक्तिमत्त्वाच्चातुर्विध्यमेव रूढानामिति तदुक्तं दण्ड्याचार्यैः "शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः। चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः" इति।

तदेतन्निराषितं तत्रैव "तदेतज्जड़मूकमूर्खादीनामन्यशून्यादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्यक्तमस्माभिः"।

**शक्तिग्रह** पु० ६त०। शक्तेः अर्थबोधकतारूपस्य ज्ञाने।

**शक्तिग्राहक** पु० शक्तिं गृह्णाति ग्रह–ण्वुल्। १कार्त्तिकेये शक्तिं ग्राहयति बोधयति ग्रह–णिच् ण्वुल्। "शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्यात् व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" इत्युक्ते शक्तिबोधके २हेतौ। शक्तिग्रहप्रकारश्च शब्दशक्तिप्रकाशिकायां दर्शितो यथा

"सङ्केतस्य ग्रहः पूर्वं वृद्धस्य व्यवहारतः। पश्चादेवोपमानाद्यैः शक्तिधीपूर्वकैरसौ"। प्रथमं पदेषु सङ्केतग्रहो वृद्धस्य व्युत्पन्नस्य शब्दाधीनव्यवहारादेव बालानां तथा हि गामानयेति केनचिन्निपुणेन नियुक्तः कश्चन व्युत्पन्नस्तद्वाक्यतोऽर्थं प्रतीत्य गवानयनं करोति तच्चोपलभमानो बाल इदं गवानयनं स्वगोचरप्रवृत्तिजन्यं चेष्टात्वान्मदीयस्तनपानादिवदित्यनुमाय सा गवानयनप्रवृत्तिः स्वविषयधर्म्मिककार्य्यताज्ञानजन्या प्रवृत्तित्वान्निजप्रवृत्तिवदिति प्रवृत्तेर्गवानयनधर्मिककार्य्यताज्ञानजन्यत्वं प्रसाध्य गवानयनगोचरतज्ज्ञानमसाधारणहेतुकं कार्य्यत्वाद्घटवदित्येवमनुमिन्वानः समुपस्थितत्वाल्लाघवाच्च श्रुतं वृद्धवाक्यमेव तदसाधारणकारणत्वेनावधारयति तदनन्तरञ्च गवादिपदानां प्रत्येकमावापोद्वापेन गवादिबुद्धौ जनकत्वमवगत्यानतिप्रसक्त्यै गवादिसङ्केतस्य तदनुकूलत्वं कल्पयति। पश्चात्तु क्वचिदुपमानाच्छक्तिग्रहो यथा गवादिपदशक्तिधीसाचिव्येन गोसादृश्यातिदेशवाक्यात् गवयपदवाच्यत्वबोधोत्तरं गवयत्वजात्यवच्छिन्ने गोसादृश्यग्रहात् गवयो गवयपदवाच्य इत्याकारः। क्वचिच्च व्याकरणात् यथा कर्मणि द्वितीया कर्त्तरि परस्मैपदमित्यानुशासनात् कर्मत्वादौ द्वितीयादेः। क्वचित् कोषादपि यथा "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति"। "सुषीमः शिशरो जड़ः। चूर्णे क्षोदः समुत्पिञ्जपिञ्जलौ भृशमाकुले" इत्यादि कोषेभ्यः शैत्यादौ शुक्लादिशब्दस्य। क्वचिद्विवरणादपि यथा पचति पाकं करोतीति तुल्यार्थकवाक्यात् कृत्यादौ तिङादेः। क्वचित् प्रसिद्धार्थशब्दसामानाधिकरण्यादपि यथा नीरूपस्पर्शवान् वायुर्निस्पर्शमूर्त्तिमन्नान इत्यादौ रूपशून्यस्पर्शवदादिषु वाय्वादिपदस्य। वायुत्वादिजातेरतीन्द्रियत्वेन स्वरूपतस्तदवच्छिन्नस्यानुपस्थित्या तत्र शक्तिग्रहायोगात् यथा वा "सत्कृत्यालङ्कृतां कन्यां ददाति कुकुदः स्मृतः" इत्यादावुक्तरीत्या कन्यादातादिषु कुकुदादिपदस्य। सहकारतरौ मधुरं रौति पिक इत्यादिकन्तु न युक्तमुक्तक्रमेण शक्तिग्रहस्योदाहरणं तिङर्थे धर्मिण्यभेदेन नामार्थान्वयस्याव्युत्पन्नत्वात् प्रत्यक्षसिद्धकोकिलत्वजात्यवच्छिन्न एव लाघवेन पिकशब्दस्य शक्त्यवच्छेदाच्च। क्वचिद्वाक्यशेषादपि यथा यवपदस्य कङ्गुप्रभृतौ म्लेच्छानां दीर्घशूके च शिष्टानां व्यवहारादेकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीतिश्रुतौ यवपदस्यार्थसन्देहे "वसन्ते सर्वशस्यानां जायते पत्रशातनम्। मोदमानास्तु तिष्ठन्ति यवाः कणिशशालिनः" इति विध्यर्थाकाङ्क्षया प्रवर्त्तमानाद्वाक्यशेषाद्दीर्घशूक एव यवपदस्य शक्तिग्रहः। यथा वा स्वाराज्यकामोऽग्निष्टोमेन यजेतेत्यादिविधिशेषीभूतेभ्यः "यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्" इत्यादिवाक्येभ्यः स्वरादिपदस्य"।

**शक्तिधर** पु० शक्तिं धरति धृ–अच्। १कार्त्तिकेये २सामर्थ्यधरे त्रि० "शक्तिधरः कुमारः" इति रघुः। भृ–क्विप् ६त०। शक्तिभृदादयोऽप्यत्र।

**शक्तिपर्ण** पु० शक्तिरिव पर्णं यस्य। सप्तपर्णे अटा०।

**शक्तिपाणि** पु० शक्तिः पाणौ यस्य। कार्त्तिकेये हला० शक्तिहस्तादयोऽप्यत्र। [शक्त्या योद्धरि।

**शक्तिहेतिक** पु० शक्तिर्हेतिः प्रहरणास्त्रं यस्य कप्।

**श(स)क्तु** पु० ब०व० श(स)च–तुन्। (छातु) भृष्टयवादिचूर्णे